# Shri Taravali

# श्रीतारावलिः

## Document Information

Text title : Shri Taravali

File name : tArAvaliH.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# श्रीतारावलिः

श्रीवत्सवत्सचिह्नाञ्चितवक्षःस्थल धरासुताजाने ।
त्वमिह दयादृष्ट्या मन्दाक्रान्तं रक्ष मां दयाशरधे(ब्धिदाशरथे) ॥ १॥

कृतयत्नविफलकारिणमतिकष्टदमर्यमात्मजं मन्दम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ २॥

शरणागतरक्षक तव चरणद्वयभक्तिरस्तु मम हृदये ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ३॥

अवमानदमापत्करमरिपक्षजयोत्सुकं सुदुःखकरम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ४॥

नानापवादभयदं सदनधनद्रव्यनाशकरकुद्दालम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ५॥

कुत्सितगुणसम्पन्नं क्रौर्यमनःसंप्रकाशितोद्योगम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ६॥

गृध्राशनमतिमलिनं निद्रालस्यादिदोषदं नृणाम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ७॥

निस्तुलदारिद्र्यगुणाप्रस्तुतकार्यप्रसक्तिदं नित्यम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ८॥

पुत्रकलत्रभ्रात्राखिलबन्धुविरोधजनकमतिकठिनम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ९॥

नीलाञ्जननिभदेहं डोलायितमानसं बिडालाक्षम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १०॥

कुनखयुतं कूर्मपदं कृशगात्रं शङ्कुरूपिणं च सदा ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ११॥

विनिमीलितसन्मीलितलोचनयुतभुजगतोत्तमाङ्गनतम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १२॥

गतलज्जाहृदयं निर्भाग्यं बृहदुदरपोषणतिलादम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १३॥

आशापिशाचभोगोल्लासकरं दौर्मनस्यदमशुभदम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १४॥

आनृतनिष्कृतिवैकृतिकलितमदोद्रेककारणं चाहम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १५॥

नरपतिचोरहुताशनभयदानसमर्थमहितकार्यकरम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १६॥

कुटिलगतिं कठिनमतिं स्फुटतरकटिघटितबाहुबलचेष्टम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १७॥

चञ्चलचित्तसमुच्छ्रितमुञ्छकवृत्तिं शनैः शनैर्यानम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १८॥

सकलजननिन्द्यमबलं विकलाङ्गं कालिमाभमपरेशम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १९॥

विगतश्रीको विलोमभावो वीरुचिमुख्यो (? ) विविधामयदः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २०॥

जनपददेशविदेशारण्यान्तरपर्यटनद्रुतिबलदः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २१॥

कामक्रोधाद्यरिभूरिभयाकरसञ्चारोऽस्फुट देहः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २२॥

दुर्जनवचनश्रवणप्रचुरप्रत्ययदः सत्सङ्गघ्नः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दशरथे ॥ २३॥

आत्मानात्मविचाराभ्यन्तरदोऽवरदः परिभूतमनाः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २४॥

मायामयजगदखिलभ्रान्तिकरो देहात्मज्ञानहतः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २५॥

तापत्रयभयदोषनिवारक भद्रगुणौघ दयाशरधे ।
किमसौ शनिरिह किं कुरते मां त्वं परिपालय दाशरथे ॥ २६॥

रत्नकिरीटधराच्युत रामानन्त मुकुन्द दयाशरधे ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २७॥

घनतरमुक्ताफलहारमिवादरणीयेयं दाशरथे ।
तारावलिरनिशं सकलानां सौख्यं नितरां वितनोतु ॥ २८॥

श्रीतडकमल्लवंशोद्भवमनिशं कृष्णरायनामधरम् ।
धरणीसुरवरवन्द्यं परिपालय तं प्रभुं दाशरथे ॥ २९॥

इति श्रीतारावलिः सम्पूर्णा ।

Proofread by Aruna Narayanan

*Shri Taravali*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*